गुडसवेति पञ्चैव यासां रसनिषेवणात् ॥
वलीपलितदौर्गन्ध्यजरादोषो न विद्यते ।
कुरङ्गकुरवः शङ्कः कुसुम्भः शिखरस्तथा ।
वैकङ्कश्च त्रिकूटश्च पर्व्वतौ रुचकर्षभौ ॥
पतङ्गनिषधौ नागक्षितिवासत्रिकूटकाः ।
हंसवैदूर्य्यकपिला द्वौ कालञ्जरजारुधौ ॥
गिरयो मूलदेशे तु सुमेरोः परिकल्पिताः ॥
जठरो देवकूटश्च द्वौ नगौ मेरुपूर्व्वतः ।
अष्टादशसहस्राणि योजनान्युदगायतौ ॥
पृथुतुङ्गौ द्विसाहस्रयोजनं तापसर्षभ ! ।
पवनः पारियात्रश्च मेरोः पश्चिमतः स्थितौ ॥
तथा प्रमाणौ कैलासकरवीरौ तु दक्षिणे ।
प्रागायतावुत्तरेण त्रिशृङ्गमकरौ तथा ॥
अष्टाभिरेतैर्गिरिभिर्भाति काञ्चनपर्व्वतः ।
मेरोर्म्मूर्द्धनि विप्राग्र्य ! मध्ये विश्वसृजः पुरी ।
चतुरस्रा शातकौम्भी योजनायतविस्तृता ॥
दिक्पालानां तथा पूर्य्यः पूर्व्वादिषु यथाक्रमम् ।
ब्रह्मपुर्य्याश्चतुर्थेन भागेन परिकल्पिता ॥
तत्र ब्रह्मा च रुद्रश्च शक्रश्चापि सुरेश्वरः ।
समेत्य विविधैर्यज्ञैर्यजन्ते भूरिदक्षिणैः ॥
तुम्बुरुर्नारदश्चैव विश्वावसुर्हाहाहूहूः ।
अभिगम्यामरश्रेष्ठं स्तुवन्ति विविधैः स्तवैः ॥
सप्तर्षयो महात्मानः कश्यपश्च प्रजापतिः ।
तत्र गच्छन्ति भद्रं ते सदा पर्व्वणि पर्व्वणि ॥
तस्यैव मूर्द्धन्युशना काव्यो दैत्यैर्महीयते ।
तस्य हैमानि रत्नानि तस्येमे रत्नपर्व्वताः ॥
तस्मात् कुवेरो भगवांश्चतुर्थं भागमश्नुते ।
ततः कलांशं वित्तस्य मनुष्येभ्यः प्रयच्छति ॥
पार्श्वे तस्योत्तरे दिव्यं सर्व्वर्त्तुकुसुमान्वितम् ।
कर्णिकारवनं रम्यं शिलाजालसमुद्गतम् ॥
तत्र साक्षान्महादेवो भीमैर्भूतैः समावृतः ।
पार्व्वत्या सह देवेशो रमते भूतभावनः ॥
कर्णिकारमयीं मालां दधदापादलम्बिनीम् ॥
तस्य शैलस्य शिखरात् क्षीरधारा महामते ! ।
विश्वरूपा परिमिता भीमनिर्घातनिस्वना ॥
पुण्या पुण्यतमैर्ज्जुष्टा गङ्गा भागीरथी शुभा ।
तां धारयामास तदा दुर्द्धरां पर्व्वतैरपि ॥
शतं वर्षसहस्राणां शिरसैव पिनाकधृक् ।
मेरोस्तु शिखराद्देवी भिद्यमाना चतुर्द्धिधा ॥
सीता चालकनन्देति वङ्क्षुर्भद्रेति कीर्त्तिता ।
सीता तु ब्रह्मसदनात् केशरादिमहाचलान् ॥
अतिक्रम्य प्रस्रवन्ती गन्धमादनमूर्द्धसु ।
पतित्वा द्विज ! वर्षञ्च भद्राश्वं पुनती क्रमात् ।
प्राच्यां दिशि महाभाग ! प्रविष्टा लवणोदधिम् ॥
माल्यवच्छिखराद्वङ्क्षुः पतित्वा केतुमालके ।
प्रतीच्यां दिशि विप्रेन्द्र ! प्रविवेश सरित्पतिम् ॥
भद्रा चोत्तरतो मेरुशिखरात् पतिता गिरीन् ।
अतिक्रम्य शृङ्गवतः शृङ्गाद्वेगेन पातुका ।
उत्तरांश्च कुरून् प्राप्य प्रविष्टा लवणार्णवम् ॥
तथैवालकनन्दा च पतन्ती गिरिमूर्द्धसु ।
हिमालयं विनिर्भिद्य भारतं वर्षमेत्य च ।
लवणाम्बुधिमभ्येति दक्षिणस्यां दिशि द्विज ! ॥

मेरोस्तु पश्चिमे पार्श्वे केतुमालो महामते ! ।
आयुर्दशसहस्राणि वर्षाणां तत्र मानवे ॥
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः ।
वीतरोगशोकभया नित्यमानन्दवर्त्तिनः ।
जायन्ते मानवास्तत्र प्रतप्तकनकप्रभाः ॥ * ॥
गन्धमादनशृङ्गेषु कुवेरः सह राक्षसैः ।
अप्सरोगणगन्धर्व्वैर्मोदते गुह्यकाधिपः ॥
गन्धमादनपार्श्वे तु गण्डशैलाः सहस्रशः ।
एकादशसहस्राणि वर्षाणां परमायुषः ॥
तत्र हृष्टा नराः सर्व्वे बलवीर्य्यपराक्रमाः ।
स्त्रियश्चोत्पलपत्राभाः सर्व्वाः सुप्रियदर्शनाः ॥
उत्तराः कुरवश्चैव भारतञ्च महामते ! ।
धनुःसंस्थे महाभाग ! द्विवर्षे दक्षिणोत्तरे ॥
इलावृतं मध्यमन्तु पञ्चवर्षाणि चैव हि ।
उत्तरोत्तरमेतेभ्यो वर्षमुद्रिच्यते गुणैः ॥
अपरेषु च वर्षेषु सर्व्वेषु भारतं विना ।
आयुःप्रमाणं लोकानां दशवर्षसहस्रकम् ॥
एवमेषा महाभाग ! पृथिवी पर्व्वतैश्चिता ॥”
इति पद्मपुराणे भूमिखण्डे भूगोलवर्णने १२८ अध्यायः ॥

शौष उवाच ।

“नवस्वेतेषु वर्षेषु भगवान् भूतभावनः ।
अनुग्रहाय लोकानामास्ते मायावपुर्हरः ॥
इलावृते तु भगवान् भव एकः सहोमया ।
आस्ते विहारनिरतो नान्यस्तत्र पुमान् द्विज ! ॥
भवानीशापतो ब्रह्मन् ! प्रविशेन्न कदाचन ।
यत्र प्रविष्टो मोहेन सुतो वैवस्वतस्य वै ॥
इलः स्त्रीभावमापन्नो यस्यां जातः पुरूरवाः ।
तत्र सङ्कर्षणं देवं कलां विष्णोर्महात्मनः ।
भवो भवान्या सहितः स्तौति भक्तिसमन्वितः ॥
भद्राश्वे द्विज ! वर्षे तु हयग्रीवाकृतिर्हरिः ।
वसते वर्षपुरुषास्तं स्तुवन्ति जगद्गुरुम् ॥ * ॥
हरिवर्षे तु भगवान्नरसिंहवपुर्धरः ।
स्तूयते दैत्यपतिना प्रह्लादेन महात्मना ॥
केतुमाले च भगवान् कामदेवस्वरूपवान् ।
प्रजापतेर्दुहितृभिः सहैव रमया सदा ॥
स्तूयते परया भक्त्या जगन्मोहनरूपधृक् ॥ * ॥
रम्यके भगवानास्ते मत्स्यरूपी दयापरः ।
मनुर्वैवस्वतस्तञ्च स्तौति भक्त्या कृतैः स्तवैः ॥ * ॥
हिरण्मये तु भगवानास्ते कूर्म्मतनुं दधत् ।
प्रेताधिराजस्तं स्तौति भक्त्या परमया युतः ॥
कुरुवर्षे च भगवान् वराहः सेव्यते जनैः ।
तं देवी यं क्षितिः स्तौति तद्वर्षपतिभिः सह ॥
वर्षे किंपुरुषे ब्रह्मन् ! भगवानादिपूरुषः ।
सीतया विहरन्नास्ते सततं लक्ष्मणाग्रजः ॥
तत्र किंपुरुषैः सार्द्धं भक्त्या मारुतनन्दनः ।
पार्ष्णिसेनेन च सह स्तौति भक्त्या विभावितः ॥
भारते च तथा वर्षे नरनारायणावृषी ।
नारदः स्तौति भगवान् भगवन्तौ कृतानतिः ॥
द्वीपेऽस्मिन् बहवः सन्ति गिरयः सरितस्तथा ।
देशाश्च बहवो ब्रह्मंस्तांस्ते वक्ष्याम्यनुक्रमात् ॥
मेरोरुत्तरतः सर्व्वान् पर्य्यायेण ब्रवीम्यहम् ।

दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे ॥
उत्तराः कुरवो नाम पुण्याः सिद्धनिषेविताः ।
तत्र वृक्षा मधुफला नित्यं पुष्पफलोपगाः ॥
सुगन्धीनि च पुष्पाणि फलानि रसवन्ति च ।
सर्व्वे कामदुघा वृक्षा लताः कामप्रपूरिकाः ॥
अपरे क्षीरिणो नाम तरवो मुनिपुङ्गव ! ।
ये स्रवन्ति सदा क्षीरं रसैरमृतसन्निभम् ॥
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्व्वा मणिमयी भूमिः सूक्ष्महाटकवालुका ॥
सर्व्वर्त्तुसुखदा नित्यं पङ्कपांशुरवर्ज्जिता ।
स्वर्गभोगावशेषेण जायन्ते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्व्वे चारुमुखाम्बुजाः ।
मिथुनानि च जायन्ते स्त्रियः सुरसुतोपमाः ॥
तेषान्ते क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम् ।
मिथुनं जायते काले समन्ताच्च प्रवर्द्धते ॥
तुल्यरूपगुणोपेतं तुल्यवेशवयस्तथा ।
निरामया निराबाधाः सदानन्दविवर्त्तिनः ॥
एकादशसहस्राणि तत्र वर्षाणि वै जनाः ।
जीवन्ति ते महाभाग ! न चान्योन्यं हनन्ति च ॥
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः ।
तान्निर्हरन्तीह मृतान् दरीषु प्रक्षिपन्ति च ॥
उत्तराः कुरवो ब्रह्मन् ! व्याख्यातास्ते समासतः । * ।
हिरण्मये रम्यके च एष धर्म्मः प्रकीर्त्तितः ॥
मेरोः पार्श्वमहं पूर्व्वं वक्ष्ये ब्रह्मन् ! यथातथम् ।
भद्राश्वे भद्रश्रवा नाम तत्र ब्रह्मन् ! महीपतिः ॥
भद्रसालवनं यत्र कालाम्रश्च महाद्रुमः ।
कालाम्रो नाम वृक्षोऽसौ सिद्धचारणसेवितः ॥
योजनैकसमुत्सेधो नित्यपुष्पफलः शुभः ।
तत्र ते पुरुषाः श्वेतास्तेजोयुक्ता महाबलाः ॥
कुमुदाभाः स्त्रियस्तत्र चारुनासाः सुलोचनाः ।
चन्द्राभचारुरूपाश्च पूर्णेन्दुसदृशाननाः ॥
नृत्यगीतकलाभिज्ञाश्चन्द्रशीतलकान्तयः ।
दशवर्षसहस्राणि तत्रायुर्ब्राह्मणर्षभ ! ॥
कालाम्ररसपानेन नित्यं सुस्थिरयौवनाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः ।
सर्व्वकामफलः पुण्यः सिद्धचारणसेवितः ॥
द्वीपख्यातिकरः श्रीमान् सहस्रयोजनोच्छ्रितः ।
अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ॥
परिणाहस्तु वृक्षस्य रसानां रसभेदिनाम् ।
तप्तादित्यवर्णाश्च जायन्ते तत्र मानवाः ॥ * ॥
तथा माल्यवतः शृङ्गे दृश्यते हव्यवाहनः ।
नाम्ना सम्वर्त्तको नाम कालाग्निः प्रलयेऽन्तकृत् ॥
तथा माल्यवतः शृङ्गे पूर्व्वे पूर्व्वानुगण्डिकाः ।
योजनानां सहस्राणि पञ्चषण्माल्यवान् द्विज ! ।
महारजतसङ्काशा जायन्ते तत्र मानवाः ।
ब्रह्मलोकच्युताः सर्व्वे जायन्ते तत्र वै नराः ॥
तपस्तप्यन्ति ते तीव्रं भवन्ति ह्यूर्द्ध्वरेतसः ।
रक्षणार्थन्तु भूतानां न विशन्ति दिवाकरम् ॥
षष्टिस्तानि सहस्राणि षष्टिरेव शतानि च ।
अरुणस्याग्रतो यान्ति परिवार्य्य दिवाकरम् ॥